CLASS : 10th (Secondary) **Code No. 2708**

**Series : Sec. M/16**

*रोल नं०* | | | | | | | | | | **SET : A**

# संस्कृत

*(Academic)*

**1st SEMESTER**

(Only for Re-appear Candidates)

(New Book)

**शेमुषी भाग – 2**

**(Morning Session)**

*समय* **2½** *घण्टे ]* *[ पूर्णांक :* **80**

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ* **8** *तथा प्रश्न* **12** *हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये* ***कोड नम्बर*** *तथा* ***सेट*** *को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है,* ***परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***



www.mseducationtv.com

***निर्देशः –*** *(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

( **अपठित-अवबोधनम्** )

**1.** अधोलिखितम् अनुच्छेदं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – $2 \times 5 = 10$

संस्कृतभाषा भाषासु सर्वप्राचीना सर्वोत्तमा चास्ति। प्राचीनकाले संस्कृतभाषा लोकव्यवहारस्य भाषा आसीत्। जनाः संस्कृतभाषायां वार्तालापं कुर्वन्ति स्म। राजकार्याणि आपि संस्कृतभाषायामेव भवन्ति स्म। भारतीयभाषाणां समृद्धिः संस्कृतभाषां विना न भवितुं शक्नोति। इयं वैज्ञानिकी समृद्धा च भाषा अस्ति।

(क) जना संस्कृतभाषायां किम् कुर्वन्ति स्म ?

(ख) प्राचीनकाले संस्कृतभाषा कस्य भाषा आसीत् ?

(ग) भाषासु का सर्वप्राचीना सर्वोत्तमा चास्ति ?

(घ) केषां समृद्धिः संस्कृतभाषां विना न भवितुं शक्नोति ?

(ङ) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।

**खण्डः 'ख'**

( **रचनात्मक-लेखनम्** )

**2.** भवतः नाम जितेशः अस्ति। अध्ययनस्य प्रगतिविषये भ्रातरं प्रति लिखिते पत्रे मञ्जूषायां प्रदत्तैः पदैः पूरयित्वा उत्तरपुस्तिकायां लिखत – $1 \times 5 = 5$



www.mseducationtv.com

परीक्षाभवनम्
तिथिः

पूज्य भ्रातः,

नमस्ते।

अधुना मम (i) ............ नियमेन आरब्धम्। अहं प्रतिदिनं प्रातः (ii) ............ उत्तिष्ठामि। सप्तवादनपर्यन्तं पठितानां (iii) ............ आवृत्तिं करोमि। संस्कृतविषये मया प्रथमं स्थानं प्राप्तम्। गणिते मम (iv) ............ अधुना इरीभूता। पितृभ्यां मम प्रणामाः।

भवदीयः अनुजः
(v) ............।

**मञ्जूषा**

| जितेशः, दुर्बलता, अध्ययनम्, पञ्चवादने, पाठानाम् । |
|---|

**3.** चित्रं दृष्ट्वा मञ्जूषातः उचितपदानि अवचित्य रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां लिखत – 1 × 5 = 5





www.mseducationtv.com

(क) इदं चित्रं ................ वर्तते।

(ख) सरोवरतटे ................ वृक्षाः सन्ति।

(ग) सरोवरस्य जलं ................ वर्तते।

(घ) तटे ................ विकसितानि सन्ति।

(ङ) वृक्षेषु ................ तिष्ठन्ति।

**मञ्जूषा**

| खगाः, पुष्पाणि, सरोवरतटस्य, सर्वत्र, निर्मलम् । |
|---|

**अथवा**

( **केवलं प्रज्ञाचक्षुर्भ्यः** )

'मम जननी' इति विषयम् अधिकृत्य पञ्चवाक्यानि संस्कृतभाषायां लिखत।

**खण्डः 'ग'**

( **अनुप्रयुक्त-व्याकरणम्** )

**4.** (क) करणकारकस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

(ख) अव्ययस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**खण्डः 'घ'**

( **पठित-अवबोधनम्** )

**5.** अधोलिखितश्लोकस्य हिन्दीभाषायां व्याख्या कार्या – 5

*वयोबलशरीराणि देशकालाशनानि च ।*
*समीक्ष्य कुर्याद् व्यायाममन्यथा रोगमाप्नुयात् ।।*

**अथवा**



www.mseducationtv.com

*विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम् ।*
*अश्वश्चेद् धावने वीरः भारस्य वहने खरः ।।*

**6.** अधोलिखितगद्यांशस्य हिन्दीभाषायां व्याख्या कार्या – 5

एषः भवतोः सौन्दर्यावलोकजनितेन कौतूहलेन पृच्छामिक्षत्रियकुल-पितामहयो सूर्यचन्द्रयोः को वा भवतोर्वंशस्य कर्त्ता ?

**अथवा**

एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श।

**7.** अधोलिखितासु ***सूक्तिद्वयस्य*** भावं हिन्दीभाषायां लिखत – $2\frac{1}{2} \times 2 = 5$

(क) प्रस्तरतले लतातरुगुल्मा नो भवन्तु पिष्टाः।

(ख) हरिततरुणां ललितलतानां माला रमणीया।

(ग) शरीरोपचयः कान्तिर्गात्राणां सुविभक्तता।

**8.** अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतपूर्णवाक्येन लिखत – $2 \times 3 = 6$

*आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।*
*नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।।*

(क) केन समः बन्धुः नास्ति ?

(ख) शरीरस्थः रिपुः कः अस्ति ?

(ग) किं कृत्वा मनुष्यः नावसीदति ?

**9.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतपूर्णवाक्येन लिखत – $2 \times 5 = 10$



www.mseducationtv.com

ततस्तया वृद्धदासी साभिप्रायमालोकिता। तस्य हस्तात् प्रस्थमात्रं धान्यमादाय स्वगृहस्य चत्वरे तं प्रक्षालितपादम् उपावेशयत्। ततस्तान् सुरभीन् शालीनातपे किञ्चिद् विशोष्य मुहुर्मुहुः परिवर्त्य सभायां भूमौ अघट्टयत्। तुषेभ्यस्तण्डुलान्पृथक् कृत्वा धात्रीमुक्तवती-मातः ! इमान् भूषणमार्जनसमर्थान् तुषान् स्वर्णकारेभ्यो देहि।

(क) इमान् तुषान् केभ्यः देहि ?

(ख) साभिप्रायं का अवलोकिता ?

(ग) कुमारी तुषेभ्यः कान् पृथक् कृतवती ?

(घ) कुमारी शालीन् किं कृत्वा समायां भूमौ अघट्टयत् ?

(ङ) कुमारी शक्तिकुमारस्य हस्तात् किमादाय उपावेशयत् ?

**10.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – $1 \times 5 = 5$

(क) फलच्छायासमन्वितः <u>वृक्षः</u> सेवितव्यः।

(ख) बुद्धिमती <u>चपेटतया</u> पुत्रौ प्रहृतवती।

(ग) <u>गात्राणां</u> सुविभक्तता व्यायामेन संभवति।

(घ) राजन् ! अलम् <u>अतिदाक्षिण्येन</u>।

(ङ) <u>स्वस्थजीवनाय</u> प्रदूषणरहिते वातावरणे भ्रमणीयम्।

**11.** 'शेमुषी' द्वितीयो भागः पाठ्यपुस्तकात् प्रथमसत्रीयपाठ्यक्रमात् कोऽपि ***एकः*** श्लोकः संस्कृतभाषायां लिखत। योऽस्मिन् प्रश्नपत्रे न स्यात्। 4

**खण्डः 'ङ'**

**( बहुविकल्पीय - खण्डम् )**

**12.** अधोलिखितप्रश्नानाम् प्रदत्तोत्तरविकल्पेषु एकं ***शुद्धविकल्पं*** विचित्य उत्तरपुस्तिकायां लिखत – $1 \times 16 = 16$

(क) 'सेयम्' पदस्य सन्धिविच्छेदोऽस्ति –

(i) से + यम् (ii) सा + इयम्

(iii) सा + यम् (iv) सै + यम्



www.mseducationtv.com

(ख) 'कः + अत्र' सन्धियुक्तपदम् –

(i) कोऽत्र (ii) कस्त्र

(iii) कात्र (iv) कमत्र

(ग) 'पितरौ' इति पदे कः समासोऽस्ति ?

(i) कर्मधारयः (ii) तत्पुरुषः

(iii) द्वन्द्वः (iv) द्विगुः

(घ) 'निर्गुणम्' इति पदस्य समासविग्रहः –

(i) गुणे अभावः (ii) गुणानाम् अभावः

(iii) गुणेन भावः (iv) गुणम् भवः

(ङ) 'सह' इति पदस्य योगे का विभक्तिः प्रयुज्यते ?

(i) प्रथमा (ii) द्वितीया

(iii) चतुर्थी (iv) तृतीया

(च) 'वायुमण्डलं …………… प्रदूषितमस्ति। (रिक्तस्थानपूर्तिः अव्ययपदेन)

(i) भृशम् (ii) देवं

(iii) मुनिम् (iv) रामं

(छ) 'करणीयम्' इति पदे कः प्रत्ययः ?

(i) टाप् (ii) ङीप्

(iii) अनीयर् (iv) तव्यत्

(ज) 'छदत्वम्' इति पदे कः प्रत्ययः ?

(i) तल् (ii) त्व

(iii) तव्यत् (iv) क्त्वा

(झ) 'गुरुणा' इति पदे का विभक्तिः वर्तते ?

(i) प्रथमाविभक्तिः (ii) द्वितीयाविभक्तिः

(iii) तृतीयाविभक्तिः (iv) चतुर्थीविभक्तिः



www.mseducationtv.com

(ञ) 'राम' शब्दस्य द्वितीया-एकवचने शब्दरूपम् अस्ति –

(i) रामाय (ii) रामेण

(iii) रामे (iv) रामम्

(ट) 'वसति' इति पदे कः लकारः वर्तते ?

(i) लट्लकारः (ii) लृट्लकारः

(iii) लोट्लकारः (iv) लङ्लकारः

(ठ) पठ्धातो लङ्लकारे प्रथमपुरुषैकवचने रूपं भवति –

(i) अपठः (ii) अपठत्

(iii) पठति (iv) पठिष्यति

(ड) वने **30** वृक्षा : सन्ति। (अङ्कस्थाने संस्कृतसंख्यावाचकपदं लिखत)

(i) विंशतिः (ii) चत्वारिशंत्

(iii) त्रिंशत् (iv) पञ्चाशत्

(ढ) 'कुटिलम्' इति पदस्य समानार्थकपदम् –

(i) वक्रम् (ii) आम्रम्

(iii) रसालम् (iv) जलम्

(ण) 'सार्थकम्' इति पदस्य विलोमपदम् अस्ति –

(i) देवम् (ii) रूपम्

(iii) निरर्थकम् (iv) विश्वम्

(त) 'अतिदीर्घः प्रवासः' अत्र विशेषणपदम् किम् ?

(i) अतिदीर्घः (ii) दीर्घः

(iii) प्रवासः (iv) वासः



www.mseducationtv.com